# 2022

## SANSKRIT

Paper : SKT-HC-6026

**( Sanskrit Composition and Communication )**

( Honours Core )

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

**1.** Answer any *two* from the following : 5×2=10

अधस्तनेषु प्रश्नद्वयस्य उत्तरं लेखनीयम्—

*(a)* What are the विभक्तिs to be used in connection with the following context (any *five*)? 1×5=5

निम्नलिखितप्रसङ्गेषु का विभक्तिः व्यवह्रियते (**पञ्चकस्य**)?

उक्ते कर्मणि ; सम्बोधने ; प्रति योगे ; अपेक्षार्थे ; सम्प्रदाने ; अव्यययोगे ; कालाध्वनोरत्यन्तसंयोगे ; भावे।

(b) Write down the compounded form of the following (any *five*) : 1×5=5

अधस्तनानां समस्तपदं प्रदेयम् (पञ्चकस्य)—

जाया च पतिः च ; पङ्के जायते यत् तत् ; हरिः च हरः च ; भेरी च पटहः च ; प्राप्तम् उदकं येन ; मुखं च नासिका च ; अहिः च नकुलः च ; पीतम् अम्बरं यस्य सः।

(c) Substitute single word (any *five*) : 1×5=5

एकेन पदेन लिखतु (पञ्चकस्य)—

√श्रु + तव्य ; √पाल् + अनीयर् ; आ-√ह्वे + ल्यप् ; √भृ + शतृ स्त्रियाम् ङीप् ; √स्मृ + ण्वुल् ; √हन् + क्तवतु (पुं.) ; √वस् + क्त्वाच् ; √कृ + क्त स्त्रियाम् टाप्।

2. Change the voices in the following (any *five*) : 2×5=10

अधस्तनेषु वाक्यपञ्चकस्य वाच्यं परिवर्तनीयम्—

(a) सज्जनः मानवसेवां करोति।

(b) मात्रा शिशुः परिपाल्यते।

(c) धनी दरिद्राय धनं ददाति।

(d) शोभनं गृहम् इदं गृहस्थेन निर्मितम्।

(e) पुरातनः छात्रः नवीनं छात्रं सभाजयति।





(f) गुणी गुणं वेत्ति।

(g) राज्ञा पूज्यन्ते विद्वांसः।

(h) व्यासदेवः महाभारतं रचितवान्।

3. Translate into English (any *two*) : 5×2=10

अधस्तनेषु वर्गद्वयस्य आङ्गल्यानुवादः करणीयः —

(a) उज्ज्वलः आकाशः। विहगाः कूजन्ति मधुरम्। वातः प्रवहति शीतलः। प्रकृतिः अस्माकं जननी। वयं पृथिव्याः अपत्यजनाः।

(b) शोभनं विद्यालयगृहम् इदम्। छात्राः संस्कृतं पठन्ति उच्चैः। सम्यक् अस्ति तेषाम् उच्चारणम्। गुरुः पाठयति व्याकरणम्। छात्राः गुरुं पृच्छन्ति।

(c) माता अन्नं पचति। पिता आपणात् द्रव्याणि आनयति। माता भिक्षुकाय अन्नं ददाति। पिता सन्तानेषु स्निह्यति। मातरि गतायां पुत्राः वार्तालापं कुर्वन्ति।

(d) शङ्करदेवः असमप्रदेशस्य महान् पुरुषः आसीत्। अनेन धर्मगुरुणा असमे नववैष्णवधर्मः प्रचारितः आसीत्। माधवदेवः अस्य शिष्यः आसीत्। अङ्कीयानाट्यकला महापुरुषस्य शङ्करदेवस्य अनुपमा सृष्टिः। तत्कृतिः अस्माभिः सर्वथा रक्षणीया अस्ति।

4. Translate into Sanskrit (any *two*) : 5×2=10

अधस्तनेषु वर्गद्वयस्य संस्कृतानुवादः करणीयः —

*(a)* It is a good time for Sanskrit. People are being attracted to this language. Many people want to learn Sanskrit now. Sanskrit is not only a language but it is the soul of India. All Indians should respect this language.

*(b)* Assam is a land of natural beauty. This place is just like the daughter of nature. Assam is a place of many languages and many cultures. This State is a place of unity in diversity. The State called Meghalaya is situated near Assam.

*(c)* One should not tell a lie. To tell a lie is a sin. Death is better than a sin. Death causes momentary suffering. But a sin brings censure to the whole family.

*(d)* In ancient India caste system originated on the basis of quality and action. Lord Krishna told this in the *Shrimadbhagavadgita*. In the *Gita*, Lord Krishna is the speaker. Arjuna is the listener here. But the conversation is beneficial for all.



( Continued )



5. Answer the following (any *four*) : 10×4=40

अधस्तनानां उत्तरं लेखनीयम् (चतुष्कस्य)—

*(a)* Reproduce in the style of conversation through ten Sanskrit sentences the discussion between a father and a son regarding a daily routine.

दैनन्दिनजीवनचर्याविषयकं पितूपुत्रयोः मध्ये जायमानम् आलोचनं गृहीत्वा दशसंख्यकसरलसंस्कृतवाक्यमाध्यमेन कथोपकथनम् उपस्थापयतु।

*(b)* Draw the pen-picture of a classroom scenario where the conversation between a teacher and a student on the benefit of Yoga goes on (through ten sentences in Sanskrit).

श्रेण्यां गुरुशिष्ययोर्मध्ये चलितं योगाभ्याससुफलविषयकं वार्तालापम् आश्रित्य कथोपकथनदृश्यम् उपस्थापयतु दशभिः सरलसंस्कृतवाक्यैः।

*(c)* Write an essay on any *one* of the following :

अधस्तनयोः एकतरं विषयम् अधिकृत्य एकः प्रबन्धः प्रस्तूयताम्—

महाकविकालिदासः ; रामायणम्।

*(d)* Compose an essay by taking any *one* from the following topics :

निम्नलिखितप्रसङ्गद्वयात् एकस्य विषये निबन्धः विरचनीयः —

शिक्षार्थिजीवने क्रीडा ; असमस्य बिहूत्सवः।



( Turn Over )

(e) Compose a short story on the basis of the following outlines (in Sanskrit) :

अधोलिखितसंकेतपदजातम् आधारीकृत्य एका लघुकथा विरचनीया (संस्कृतभाषया)—

काकः —पिपासार्तः —घटः —अधोभागे जलम् —शिलाखण्डानि—प्रक्षेपणम्—उपरि जलम् आगतम्—पिपासा निवारिता।

(f) Construct a short story in Sanskrit by using the following outlines :

अधस्तनसंकेताधारेण संस्कृतभाषया लघुकथाम् एकाम् उपस्थापयतु—

मिथ्यावादी गोपालकः —मृषा सूचयति व्याघ्रागमनम्—ग्रामनिवासिनः आगच्छन्ति—गोपालकः हसति—दिवसत्रयम् अभवत्—सत्यमेव व्याघ्रस्य आगमनं जातम्—उच्चैः आर्तनादं करोति—न कोऽपि आगच्छति—व्याघ्रस्य आक्रमणेन म्रियते।

(g) Answer the following questions *either* in English *or* in Sanskrit after reading the following passage :

अधोलिखित-अनुच्छेदपाठादनन्तरं संस्कृतेन आङ्गलभाषया वा प्रश्नानाम् उत्तराणि प्रदेयानि—

द्वैपायनः व्यासः 'महाभारतम्' अरचयत्। द्वीपे तज्जन्म अभवत् इति कृत्वा तन्नाम द्वैपायनः जातः। 'शतसाहस्रीसंहिता' इति महाभारतस्य अपरम् अभिधानम्।





अस्मिन् महाकाव्ये मूलरसरूपेण शान्तः वर्त्तते। निर्वेदस्थायिभावकः अयं रसः। महाकाव्यगते भीष्मपर्वणि श्रीमद्भगवद्गीतायाः अन्तर्भावः अस्ति। भारतीयजीवनदर्शने अस्य महाकाव्यस्य महान् प्रभावः सर्वत्र परिलक्ष्यते।

(i) Who composed the *Mahābhārata*?
'महाभारतम्' इति कस्य कृतिः?

(ii) Why is Vyāsa called Dvaipāyana?
कथं व्यासः द्वैपायनः इत्युच्यते?

(iii) What is the other name of the *Mahābhārata*?
महाभारतस्य नामान्तरं किम् अस्ति?

(iv) What is the predominant sentiment of this epic?
अस्य ग्रन्थस्य अङ्गीरसः कः अस्ति?

(v) What is there in the 'भीष्मपर्व' of the *Mahābhārata*?
महाभारतस्य भीष्मपर्वणि किम् अस्ति?

(h) Read the following passage and write the answers of the questions *either* in Sanskrit *or* in English :

अधस्तन-अनुच्छेदपाठपूर्वकं जिज्ञासितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया आङ्गलभाषया वा लिखतु—

१९४७ खीष्टाब्दे ब्रिटिशशासनात् स्वाधीनतां लब्धवत् भारतभूखण्डमिदम्। सप्तदशशतकारम्भकाले इष्ट् इण्डिया कोम्पानी इति यत् प्रतिष्ठानं वाणिज्यार्थं भारतवर्षम्

आगच्छति स्म परवर्तिसमये तदेवानुष्ठानं प्रदेशेऽस्मिन् द्विशताधिकवर्षाणि यावत् राजत्वं परिचालितवत्। पराधीने भारते मनुष्याः अधमर्णाः जाताः, शान्तिः तु पराहता आसीत्। अतः केचन महापुरुषाः काश्चन वीराङ्गनाः च भारतीयपराधीनशृङ्खलां मोचयितुं ब्रिटिशशासकैः सह कृते सम्मुखसमरे गृहीतभागाः जाताः। तद्वीरपुरुषाणां तादृक्वीराङ्गनानाम् आत्मबलिदानेन एव संप्राप्तम् एतत् अस्मदीयं स्वातन्त्र्यम्।

*(i)* When did India receive Independence?
कदा भारते स्वाधीनता आगता आसीत्?

*(ii)* When did the East India Company come to India?
कदा इष्ट् इण्डिया कोम्पानी इति भारतम् आगतवत्?

*(iii)* Why did this company arrive in India?
किमर्थम् इदं प्रतिष्ठानम् अत्र आगच्छति स्म?

*(iv)* What was the mental condition of the Indians during the British rule?
ब्रिटिशशासनकाले भारतीयानां मनोवृत्तिः कीदृशी आसीत्?

*(v)* How was the Indian Independence received?
भारतीयस्वातन्त्र्यं कथं प्राप्तमासीत्?

★ ★ ★